# Atimanushastavah

# અતિમાનુષસ્તવઃ

## Document Information

Text title : Atimanushastavah

File name : atimAnuShastavaH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2021

*sanskritdocuments.org*

# અતિમાનુષસ્તવઃ

પઞ્ચસ્તવ્યાં ૨ અતિમાનુષસ્તવઃ

શ્રીરસ્તુ ।

શ્રીમતે હયગ્રીવાય નમઃ ।

શ્રીમતે રામાનુજાય નમઃ ॥

શ્રીવત્સચિહ્નમિશ્રેભ્યો નમૌક્તિમધીમહે ।
યદુક્તયસ્ત્રયીકણ્ઠે યાન્તિ મઙ્ગલસૂત્રતામ્ ॥

અતિમાનુષશીલવૃત્તવેષૈરતિવૃત્તામરવિક્રમપ્રતાપૈઃ ।
અતિલઙ્ઘિતસર્વલોકસામ્યં વરયે વૈષ્ણવવૈભવાવતારમ્ ॥ ૧॥

શ્રેયઃ કિરન્તુ કિરણાશ્ચરણારવિન્દ-
    નિષ્યન્દમાનમકરન્દરસૌઘદેશ્યાઃ ।
તજ્જાઃ શ્રુતેર્મધુન ઉત્સ ઇતિ પ્રતીતા-
    માઙ્ગલ્યરઙ્ગનિલયસ્ય પરસ્ય ધામ્નઃ ॥ ૨॥

શ્રીમત્પરાઙ્કુશમુનીન્દ્રમનોનિવાસા-
    ત્તજ્જાનુરાગરસમજ્જનમઞ્જસાऽऽપ્ય ।
અદ્યાપ્યનારતતદુત્થિતરાગયોગં
    શ્રીરઙ્ગરાજચરણામ્બુજમુન્નયામઃ ॥ ૩॥

વજ્રધ્વજાઙ્કુશસુધાકલશાતપત્ર-
    પઙ્કેરુહાઙ્કપરિકર્મપરીતમન્તઃ ।
આપાદપઙ્કજવિશ‍ૃઙ્ખલદીપ્રમૌલે-
    શ્શ્રીરઙ્ગિણશ્ચરણયોર્યુગમાશ્રયામઃ ॥ ૪॥

શ્રીરઙ્ગરાજચરણૌ પ્રણુમો યયોઃ ખ-
    લ્વેકસ્ત્રિવિક્રમવિધૌ વસુધામશેષામ્ ।
વ્યક્રંસ્ત સાચલકુલામપિ વિપ્રકીર્ણ-

સ્થૂલાવલગ્નસિકતામિવ નિર્ણતોઽચ્યમ્ ॥ ૫॥

જ્ઞાનં બલં વિપુલમીશનવીર્યશક્તિ-
તેજાંસિ ચ ત્રિયુગભૂયમુપાગતાનિ ।
પૂર્ણાનિ ષટ્ ચ પરિગૃહ્ય ભવંશ્ચતુર્ધા
ભક્તં જનં ત્વમનુજગ્રહિથાનુરાગાત્ ॥ ૬॥

એકાન્તમઙ્ગલગુણાસ્પદમસ્તહેયં
નિત્યં પદં તવ યતસ્તત એવ દેવ! ।
આમ્નાયતે તદિહ વિશ્વવિરૂપરૂપં
તેનૈવ નન્વિદમશબ્દમરૂપમાહુઃ ॥ ૭॥

શબ્દાદિહેય ઇહ ગોચર ઇન્દ્રિયાણાં
તત્પ્રત્યનીકવિભવસ્ત્વમતીન્દ્રિયોઽસિ ।
તેનૈવ તે ન બત દર્શનમસ્તિ કિઞ્ચિ-
દ્વાચો ધિયશ્ચ તત એવ ન ગોચરોઽસિ ॥ ૮॥

એવં સ્થિતે ત્વદુપસંશ્રયણાભ્યુપાયો
માનેન કેનચિદલપ્સ્યત નોપલબ્ધુમ્ ।
નો ચેદમર્ત્યમનુજાદિષુ યોનિષુ ત્વ-
મિચ્છાવિહારવિધિના સમવાતરિષ્યઃ ॥ ૯॥

શીલઃ ક એષ તવ હન્ત દયૈકસિન્ધો!
ક્ષુદ્રે પૃથગ્જનપદે જગદણ્ડમધ્યે ।
ક્ષોદીયસોઽપિ હિ જનસ્ય કૃતે કૃતી ત્વ-
મત્રાવતીર્ય નનુ લોચનગોચરોઽભૂઃ ॥ ૧૦॥

યં પાતકાત્સુમહતોઽપ્યુદધારયસ્ત્વં
ત્વત્પાદવારિપરિપૂતશિરાશ્ચ યોઽભૂત્ ।
તં વન્દસે કિલ તતશ્ચ વરં વૃણીષે
ક્રીડાવિધિર્બત! વિલક્ષણલક્ષણસ્તે ॥ ૧૧॥

ક્રીડાવિધેઃ પરિકરસ્તવ યા તુ માયા
સા મોહની ન કતમસ્ય તુ હન્ત! જન્તોઃ ।
હૈ મર્ત્યસિંહવપુષસ્તવ તેજસોંઽશે
શમ્ભુર્ભવન્ હિ શરભશ્શલભો બભૂવ ॥ ૧૨॥

યસ્યાત્મતાં ત્રિપુરભઙ્ગવિધાવધાસ્ત્વં
  ત્વચ્છક્તિતેજિતશરો વિજયી ચ યોઽભૂત્ ।
દક્ષક્રતૌ તુ કિલ તેન વિનિર્જિતસ્ત્વં
  યુક્તો વિધેયવિષયેષુ હિ કામચારઃ ॥ ૧૩॥

મુગ્ધશ્શિશુર્વટદલે શયિતોઽતિતન્વા
  તન્વા જગન્તિ બિભૃષે સવિકાસમેવ ।
ઐશીમિમાં તુ તવ શક્તિમતર્કિતવ્યા-
  મવ્યાજતઃ પ્રથયસે કિમિહાવતીર્ણઃ ॥ ૧૪॥

બ્રહ્મેશમધ્યગણના ગણનાઽર્કપઙ્ક્તૌ
  ઇન્દ્રાનુજત્વમદિતેસ્તનયત્વયોગાત્ ।
ઇક્ષ્વાકુવંશયદુવંશજનિશ્ચ હન્ત
  શ્લાઘ્યાન્યમૂન્યનુપમસ્ય પરસ્ય ધામ્નઃ ॥ ૧૫॥

ત્વન્નિર્મિતા જઠરગા ચ તવ ત્રિલોકી
  કિં ભિક્ષણાદિયમૃતે ભવતા દુરાપા ।
મધ્યે કદા તુ ન વિચક્રમિષે જગચ્ચેત્
  ત્વદ્વિક્રમૈઃ કથમિવ શ્રુતિરઞ્ચિતા સ્યાત્ ॥ ૧૬॥

પૃચ્છામિ કિઞ્ચન યદા કિલ રાઘવત્વે
  માયામૃગસ્ય વશગો મનુજત્વમૌગ્ધ્યાત્ ।
સીતાવિયોગવિવશો ન ચ તદ્ગતિજ્ઞઃ
  પ્રાદાસ્તદા પરગતિં હિ કથં સ્વગાય ॥ ૧૭॥

અક્ષુણ્ણયોગપથમગ્ર્યહતં જટાયું
  તિર્યઞ્ચમેવ બત! મોક્ષપથે નિયોક્તુમ્ ।
શક્નોષિ વેત્સિ ચ યદા સ તદા કથં ત્વં
  દેવીમવાપ્તુમનલં વ્યથિતો વિચિન્વન્ ॥ ૧૮॥

સાલાન્ હિ સપ્ત સગિરીન્સરસાતલાન્યા-
  નેકેષુમન્દજવતો નિરપત્રયસ્ત્વમ્ ।
તેષ્વેકવિવ્યથનખિન્નકપિપ્રણુન્નં
  શાખામૃગં મૃમયસે સ્મ કથં સહાયમ્ ॥ ૧૯॥

દાસસ્સખા સમભવત્તવ યઃ કપીન્દ્ર-
  સ્તદ્વિદ્વિષં કપિમમર્ષવશાજ્જિઘાંસુઃ ।

ત્વત્સ્નેહવિક્લબધિયં તમિમં કપીન્દ્રં
    વિસ્રમ્ભયન્ સપદિ સાલગિરીનવિધ્યઃ ॥ ૨૦॥

યદ્વા મૃગં મૃગયુવન્મૃગયાપથેન
    ચ્છન્નો જઘન્થ ન તુ શત્રુવધાભિમુખ્યાત્ ।
તદ્યુક્તમેવ તવ રાઘવ વંશજસ્ય
    તિર્યક્ષુ નૈવ હિ વિપક્ષતયોપચારઃ ॥ ૨૧॥

માનુષ્યકં ચરિતમાચરિતું પ્રવૃત્તો
    દેવાતિગં ચરિતમઙ્ગ! કિમઙ્ગ્યકાર્ષીઃ ।
યત્સાગરે બત બબન્ધિથ નાથ! સેતું
    શૈલૈઃપ્લવઙ્ગમસમિઙ્ગિતસંપ્રણુન્નૈઃ ॥ ૨૨॥

યો વિક્રમેણ મનુજત્વવિભૂષણેન
    દેવં વરં વરુણરાજમજ! વ્યજેષ્ઠાઃ ।
કૃત્વોપદાં દશરથં વિધિરુદ્રમુખ્યૈ-
    ર્દેવૈસ્સ્તુતશ્ચ સ કિલેન્દ્રજિતા જિતોઽસિ ॥ ૨૩॥

અબ્ધિં ન તેરિથ ન જિગ્યિથ રાક્ષસેન્દ્રં
    નૈવાસ્ય જજ્ઞિથ યદા ચ બલાબલં ત્વમ્ ।
નિસ્સંશયસ્સપદિ તસ્ય પદેઽભ્યષિઞ્ચ-
    સ્તસ્યાનુજં કથમિદં હિ વિભીષણં ચ ॥ ૨૪॥

ત્વં દક્ષિણસ્ય નિવસન્નુદધેસ્તટેઽપિ
    દૂરાન્તરોત્તરપયોધિમહાન્તરીપે ।
દૈત્યાન્નિજૈકશરપારણયૂન્ કિમેતાં
    લઙ્કાં સ્થિતોઽત્ર કુરુષે કિલ ન સ્મ ભસ્મ ॥ ૨૫॥

એતત્કથં કથય યન્મથિતસ્ત્વયાઽસૌ
    હિત્વા સ્વભાવનિયમં પ્રથિતં ત્રિલોક્યામ્ ।
અશ્વાપ્સરોવિષસુધાવિધુપારિજાત-
    લક્ષ્મ્યાત્મના પરિણતો જલધિર્બભૂવ ॥ ૨૬॥

યત્તાદૃશાગસમરિં રઘુવીર! વીક્ષ્ય
    વિશ્રમ્યતામિતિ મુમોચિથ મુગ્ધમાજૌ ।
કોઽયં ગુણઃ કતરકોટિગતઃ કિયાન્વા
    કસ્ય સ્તુતેઃ પદમહો બત! કસ્ય ભૂમિઃ ॥ ૨૭॥

યલ્લક્ષ્મણસ્ત્વદનુજો રિપુશક્તિમુગ્ધ-
    શ્શાત્રોર્ગુરુર્હનુમતસ્તુ લઘુર્બભૂવ ।
એતેન વૈ સુવિદિતોઽભવદિન્દ્રશત્રો-
    ર્માયાસ્ત્રબન્ધનનિબન્ધનજો વિમોહઃ ॥ ૨૮॥

હા હન્ત હન્ત ! ભવતશ્ચરણારવિન્દ-
    દ્વન્દ્વં કદા નુ ભવિતા વિષયો મમાક્ષ્ણોઃ ।
યોઽહં નિરર્ગલવિનિર્ગલદન્ધકારૈ-
    ર્વૃક્ષૈસ્તૃણૈશ્ચ સુલભં સમયં વ્યતીતઃ ॥ ૨૯॥

વંશં રઘોરનુજિઘૃક્ષુરિહાવતીર્ણો
    દિવ્યૈર્વવર્ષિથ તથાઽત્ર ભવદ્ગુણૌઘૈઃ ।
ત્વત્સન્નિધિપ્રભવશૈત્યજુષો યથા હિ
    વૃક્ષાશ્ચ તાન્તિમલભન્ત ભવદ્વિયોગે ॥ ૩૦॥

યે ધર્મમાચરિતુમભ્યસિતું ચ યોગં
    બોદ્ધું ચ કિઞ્ચન ન જાત્વધિકારભાજઃ ।
તેઽપિ ત્વદાચરિતભૂતલબન્ધગન્ધા-
    દ્વન્ધાતિગાઃ પરગતિં ગમિતાસ્તૃણાદ્યાઃ ॥ ૩૧॥

તાદૃગ્ગુણો નનુ બભૂવિથ રાઘવત્વે
    યસ્તાવકં ચરિતમન્વહમન્વભુઙ્ક્તઃ ।
સોઽત્રૈવ હન્ત હનુમાન્ પરમાં વિમુક્તિં
    બુદ્ધ્યાઽવધૂય ચરિતં તવ સેવતેઽસૌ ॥ ૩૨॥

યત્ત્વં કૃતાગસમપિ પ્રણતિપ્રસક્તં
    તં વાયસં પરમયા દયયાઽક્ષમિષ્ઠાઃ ।
તેનૈવ માદૃશજનસ્ય મહાગસોઽપિ
    યુક્તં સમાશ્વસનમિત્યુપધારયામિ ॥ ૩૩॥

સા પૂતના શકટમર્જુનયોશ્ચ યુગ્મં
    બાલ્યોચિતાઽન્યપરચેષ્ટિતવિસ્ફુલિઙ્ગે ।
યસ્યાલભન્ત શલભત્વમહો નિગૂઢ-
    સ્સ ત્વં વ્રજે વવૃધિષે કિલ કંસભીત્યા ॥ ૩૪॥

પશ્યત્સુ સૂરિષુ સદા પરમં પદં તે

દેવ્યા શ્રિયા સહ વસન્પરયા વિભૂત્યા ।
યોગેન યોગનિરતૈઃ પરિમૃગ્યમાણઃ
કિં ત્વં વ્રજેષુ નવનીતમહો ! વ્યમુષ્ણાઃ ॥ ૩૫॥

યં દુર્ગ્રહં સુમનસો મનસાऽપિ નિત્યં
બન્ધચ્છિદં પરમમીશમુદાહરન્તિ ।
દામ્ના નિબદ્ધ ઇતિ શુશ્રુમ તં ભવન્તં
નાલં બભૂવિથ બત ! શ્લથનાય તસ્ય ॥ ૩૬॥

ઐશં હિ શૈશવમપિ વ્યતિવેલખેલં
યત્પૂતના શકટમર્જુનયોશ્ચ યુગ્મમ્ ।
બાલ્યોચિતાન્યપરસાચિવિચેષ્ટિતેન
હન્તાલભન્ત શલભાયિતમોજસસ્તે ॥ ૩૭॥

સત્યેવ ગવ્યનિવહે નિજધામ્નિ ભૂમ્ના
પર્યન્તસદ્મસુ કિમર્થમચૂચુરસ્ત્વમ્ ।
મુષ્ણંશ્ચ કિં વ્યજઘટો ઘટશેષમગ્રે
ગોપીજનસ્ય પરિહાસપદં કિમાસીઃ ? ॥ ૩૮॥

યન્નામ નાથ નવનીતમચૂચુરસ્ત્વં
તચ્છાદનાય યદિ તે મતિરાવિરાસીત્ ।
કિં મુગ્ધ ! દિગ્ધમમુના કરપલ્લવં તે
ગાત્રે પ્રમૃજ્ય નિરગાઃ કિલ નિર્વિશઙ્કઃ ॥ ૩૯॥

ત્વામન્યગોપગૃહગવ્યમુષં યશોદા
ગુર્વી ત્વદીયમવમાનમમૃષ્યમાણા ।
પ્રેમ્ણાऽથ દામપરિણામજુષા બબન્ધ
તાદૃઙ્ ન તે ચરિતમાર્યજનાસ્સહન્તે ॥ ૪૦॥

માત્રા યદિ ત્વમસિ દામનિ સન્નિબદ્ધ-
સ્તચ્છ્રાવિણામુદિતચાક્ષુષનિર્ઝરાણામ્ ।
બદ્ધાસિ હન્ત હૃદયં ભગવન્કુતસ્ત-
ત્સર્વો હિ વશ્યવિષયે વિવૃણોતિ વીર્યમ્ ॥ ૪૧॥

કાન્તાલકાન્તમમલં કમલાયતાક્ષ-
મુદ્ભ્રૂવિલાસમુદિતસ્મિતમુન્નસં ચ ।
વક્ત્રં વહન્ પરમ ! ગોપગૃહેષુ કિં ત્વં

ગોપીમનાંસિ નવનીતમુતાભ્યમોષીઃ ॥ ૪૨॥

સર્વં ગુણાય ગુણિનામિતિ સત્યમેત-
ઘત્ખલ્વિહેતરજને મલિનત્વહેતુઃ ।
યદ્ગોપવેષવિનિષેવણમુત્તમં તે
ગોપાલનં ચ ગણયન્તિ ગુણં ગુણેષુ ॥ ૪૩॥

ગોપાલપોતકતયા નિભૃતં ધરિત્રીં
આવસ્તુકામ ઇવ સન્નપિ બાલ્યલૌલ્યાત્ ।
ઐન્દ્રં નિહન્ય મખમદ્રિમથો દધાનઃ
કિં તસ્થિષે સુરગણાય સવાસવાય ॥ ૪૪॥

વેણુક્વણપ્રણયિનિ ત્વયિ લોકનાથ!
વૃન્દાવનં ચરણસઞ્ચરણૈઃ પુનાને ।
ભાવાસ્તદા વનભુવઃ કિલ કીદૃશસ્તે
ત્વદ્ગીતસિક્તસિકતાસુ વસુન્ધરાસુ ॥ ૪૫॥

ધન્યૈશ્શ્રુતં તદિહ તાવકરાસકાલે
ગીતેન યેન્ હિ શિલાસ્સલિલામ્બભૂવુઃ ।
પઞ્ચાપિ કિઞ્ચ પરિવૃત્તગુણાનિ ભૂતા-
ન્યુર્વીકૃશાનુમરુદમ્બરશમ્બરાણિ ॥ ૪૬॥

તેભ્યઃ કૃતી ન કિલ કશ્ચિદિહાસ્તિ યે વૈ
રાસોત્સવોત્સુકધિયસ્તવ કાનનાન્તે ।
વેણુસ્વનસ્રુતરસૌઘપરિપ્લુતાન્તે
સ્વે સૃક્વણી રસનયા લિલિહુર્ભુજઙ્ગાઃ ॥ ૪૭॥

અમ્ભોદનીલમરવિન્દદલાયતાક્ષં
પિઞ્છાવતંસમુરરીકૃતવેણુપાણિમ્ ।
ત્વાં ગોપવેષપરિકર્મિતકાયકાન્તિં
ધન્યાસ્તદા દદૃશુરુન્મથિતાન્યભાવાઃ ॥ ૪૮॥

ગોવર્ધનો ગિરિવરો યમુના નદી સા
વૃન્દાવનં ચ મધુરા ચ પુરી પુરાણી ।
અદ્યાપિ હન્ત સુલભાઃ કૃતિનાં જનાના-
મેતે ભવચ્ચરણચારજુષઃ પ્રદેશાઃ ॥ ૪૯॥

વૃન્દાવને સ્થિરચરાત્મકકીટદૂર્વા-
    પર્યન્તજન્તુનિચયે બત ! યે તદાનીમ્ ।
નૈવાલભામહિ જનિં હતકાસ્ત એતે
    પાપાઃ પદં તવ કદા પુનરાશ્રયામઃ ॥ ૫૦॥

હા જન્મ તાસુ સિકતાસુ મયા ન લબ્ધં
    રાસે ત્વયા વિરહિતાઃ કિલ ગોપકન્યાઃ ।
યાસ્તાવકીનપદપઙ્ક્તિજુષોઽજુષન્ત
    નિક્ષિપ્ય તત્ર નિજમઙ્ગમનઙ્ગતપ્તમ્ ॥ ૫૧॥

આચિન્વતઃ કુસુમમંઙ્ઘ્રિસરોરુહં તે
    યે ભેજિરે બત ! વનસ્પતયો લતા વા ।
અદ્યાપિ તત્કુલભુવઃ કુલદૈવતં મે
    વૃન્દાવનં મમ ધિયં ચ સનાથયન્તિ ॥ ૫૨॥

યત્ત્વત્પ્રિયં તદિહ પુણ્યમપુણ્યમન્ય-
    ન્નાન્યત્તયોર્ભવતિ લક્ષણમત્ર જાતુ ।
ધૂર્તાયિતં તવ હિ યત્કિલ રાસગોષ્ઠ્યાં
    તત્કીર્તનં પરમપાવનમામનન્તિ ॥ ૫૩॥

યા કંસમુખ્યનૃપકીટનિબર્હણોત્થા
    સા નિર્જિતત્રિજગતસ્તવ નૈવ કીર્તિઃ ।
ગોપાલનાદિ યદિદં ભવદીયકર્મે-
    ત્યાર્દ્રીકરોતિ વિદુષાં હૃદયં તદેતત્ ॥ ૫૪॥

ગોપાલવેષપરિકર્મ પરાવરેશં
    યન્નામ ધામ પરમં તમસઃ પરસ્તાત્ ।
તત્પિચ્છલાઞ્છનસુદામકૃતોપવીતં
    ગોધૂલિધૂસરિતકુન્તલમન્તરાસ્તામ્ ॥ ૫૫॥

યદ્વૈ જરાસુતભયાદ્વિપલાયથાસ્ત્વં
    તચ્ચેન્મનુષ્યચરિતાનુવિધાનજં તે ।
તર્હિ ત્રિલોકગુરુમીશ્વરમીશ્વરાણાં
    બાણાહવે કિમિતિ શમ્ભુમજૃમ્ભયસ્ત્વમ્ ॥ ૫૬॥

જાતં કુતસ્તદકૃતજ્ઞવિચેષ્ટિતં તે
    પુત્રીયયા કિલ વરં વવૃષેવૃષાઙ્કાત્ ।

અક્ષેષુ સક્તમતિના ચ નિરાદરેણ
　　વારાણસી હરપુરી ભવતા વિદગ્ધા ॥ ૫૭॥

સઞ્જીવયન્નપિ મૃતં સુતમુત્તરાયા-
　　સ્સાન્દીપનેશ્ચિરમૃતં સુતમાનયંશ્ચ ।
ધામ્નો નિજાદ્વિજસુતાન્પુનરાનયન્વા
　　સ્વામેવ તાં તનુમહો ! કથમાનયસ્ત્વમ્ ॥ ૫૮॥

અદ્યાપિ નાસ્ત્યુપરતસ્ત્રિવિધાપચારા-
　　ત્પાપઃ પરે નિપતિતોઽસ્મિ તમસ્યપારે ।
એતાદૃશોઽહમગતિર્ભવતો દયાયાઃ
　　પાત્રં ત્વદીયચરણૌ શરણં પ્રપદ્યે ॥ ૫૯॥

વિસ્રમ્ભણં ત્વયિ ન યદ્યપિ મેઽસ્તિ નાપિ
　　શ્રદ્ધા યથોક્તવચનાર્થગતા તથાઽપિ ।
વાચં ત્વિમાં સકૃદથાપ્યસકૃન્મયોક્તાં
　　સત્યાં કુરુષ્વ દયયૈવ દયૈકસિન્ધો ॥ ૬૦॥

પાપીયસોઽપિ શરણાગતશબ્દભાજો
　　નોપેક્ષણં મમ તવોચિતમીશ્વરસ્ય ।
ત્વજ્જ્ઞાનશક્તિકરુણાસુ સતીષુ નેહ
　　પાપં પરાક્રમિતુમર્હતિ મામકીનમ્ ॥ ૬૧॥

ઇતિ પઞ્ચસ્તવ્યાં અતિમાનુષસ્તવઃ સમાપ્તઃ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Atimanushastavah*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*